International Journal of Sanskrit Research 2018; 4(6): 85-86

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(6): 85-86
© 2018 IJSR
www.anantaajournal.com
Received: 19-09-2018
Accepted: 20-10-2018

**एम् ए अनन्त**
शोधच्छात्रः कर्नाटक संस्कृत विश्वविद्यालयः, बेङ्गळूरु, कर्नाटक, भारत

**Correspondence**
**एम् ए अनन्त**
शोधच्छात्रः कर्नाटक संस्कृत विश्वविद्यालयः, बेङ्गळूरु, कर्नाटक, भारत

# श्रीवेदान्तरामानुजयतिवर्याणां जीवनेतिवृत्तम

## एम् ए अनन्त

**सारांश**
अयं लेखः एकोनविंश–क्रिस्ताब्दे कर्नाटक–तमुळुनाडु–प्रान्तयोः जीवनं यापितवतां वेदान्तरामानुजयतिवर्याणां जीवनवृत्तान्तं तदीयपाण्डित्यवैराग्यादिविषयं च प्रतिपादयितुं प्रवृत्तम्।

**कुट शब्दः** संन्यासः वैराग्यम् शास्त्राणि वेदान्तः न्यायः, इत्यादि

**प्रस्तावना**

लोकेऽस्मिन् बहवः यतयः उपलभ्यन्ते। एवमन्ये च बहवः विद्वांसोऽपि द्रष्टुं शक्यन्ते। परे च, विशिष्य, विद्यास्वनिष्णाता अपि वैराग्यशालिनो भवन्ति। केचिच्च, विद्याविहीना अपि, वैराग्यरहिता अपि, यतयः असन्तोऽपि, प्राचीननियमाचारानुष्ठाननिरताः दृश्यन्ते। परन्तु, वैराग्यशालिनोऽपि भूत्वा, उत्तमाश्रमिणोऽपि सन्तः, सर्वेष्वपि शास्त्रेषु कृतमहत्परिश्रमाः अपि भवन्तः, नियमानुष्ठाननिरता अपि विद्यमानाः जनास्तु अत्यन्तविरलाः इति सर्वसंप्रतिपन्नम्।

**प्रधानप्रतिपाद्यांशः**

एतादृशाः कदाचिदपि आसन्, सन्ति वा इत्यपि बहवः पृच्छेयुः, सन्देहं वा प्रकटीकुर्युरिति नैतदाश्चर्यावहम्। परन्तु, आसन्नेतादृशा जना अस्माकं भारतदेशे बहव इत्यत्र तु नास्ति संशीतिलेशोऽपि, भारतदेशस्यास्माकं तादृशमहादेशत्वात्।

उक्तसर्वगुणपरिपूर्णाः एके महान्तः व्यराजन्त, दक्षिणभारते, यादवाद्रौ, काञ्च्याम्, श्रीरङ्गक्षेत्रे, अन्येष्वपि श्रीवैष्णवक्षेत्रेषु वसन्तः, उर्वीमण्डलमण्डनायितयशोराशयः, 'एम्बार् जीयर्' इति तदानीन्तनकाले प्रथितनामानः, वेदान्तरामानुजयतिवर्याः। एते च महान्तः सर्वेष्वपि शास्त्रेषु कृतपर्याप्तपरिश्रमाः, भारतीयसर्वविद्यानदीष्णाः, वैराग्यमूर्तयः, स्मृतिधर्मशास्त्रग्रन्थप्रोक्ताचारानुष्ठाननिरताः, नानाग्रन्थनिर्मातारः, एकोनविंशतिक्रिस्ताब्दे प्राप्तावताराः अभवन्।

एतेषां जीवनेतिवृत्ते अवधेयांशोऽयम् – एते च यदा, षोडशवर्षीया आसन्, तदानीं एते श्रीशेषशैलक्षेत्रे भगवतः वेङ्कटाचलाधीशस्य श्रीनिवासापरनामधेयस्य दर्शनार्थं तत्रत्यमन्दिरमगच्छन्। परन्तु, तदानीं ब्रह्मचर्याश्रममलङ्कुर्वाणा एते, केनचित् कारणेन मन्दिरप्रवेशात् प्रतिरुद्धाः, तत्रत्यद्वारपालकैः। एतेन, भृशं विषण्णा भूत्वा तत्रैव शोचन्तः अतिष्ठन्। तदात्व एव, अपरे एके संन्यासिनः भगवद्दर्शनार्थमागताः, गोपुरद्वारि, तैरेव द्वारपालकैः विना प्रतिरोधमन्तःप्रवेशिताः। एतद्दृष्ट्वा ब्रह्मचर्याश्रमस्था एते द्वारपालकानपृच्छन् – कोयं पक्षपातः? कुतो वाहं भगवन्मन्दिरप्रवेशादवरुद्धः? ते च विनैवावरोधमन्तःप्रवेशावकाशं लब्धवन्तः" इति। तदानीं तत्रत्येने द्वारपालकेनोक्तम् – ते तु संन्यासिनः – मोक्षाश्रमापरनामकतुरीयाश्रमस्थाः। भवांस्तु ब्रह्मचारी। उत्तमाश्रमिणां त्वत्र देवालये प्रवेशः यदा कदाप्यनुमतः। न तथा भवतः" इति। एतदाकर्ण्य, एते यतिवर्याः (तदानीं ब्रह्मचर्याश्रमस्थाः) सत्वरं तत्रत्यं मठं प्रविश्य, तत्र विराजमानान् मठाधीशान्, संन्यासिनः उपसर्प्य, साञ्जलिबन्धं प्रणिपत्य, एवं विज्ञापयामासुः – "स्वामिन्! मयैतच्छ्रुतं यत्, अत्रत्य–श्रीवेङ्कटेशाचलाधीशमन्दिरे उत्तमाश्रमिणां यदा कदा वा देवालयान्तःप्रवेशोऽनुमत इति। अहमपि प्रतिदिनं बहुवारं भगवद्दर्शनं कर्तुमिच्छामि। अतः इदानीमेव झटिति, मह्यं संन्यासाश्रमः प्रदीयताम्, येनाहं निरन्तरायं भगवद्दर्शनभाग्यभाक् भवितुमर्हो भवामी"ति। एतच्छ्रुत्वा, श्रीशेषाचलस्थाः तत्रत्य–मठाधीशाः महदाश्चर्यं प्रकटयन्तः, एतेषां भगवद्दर्शनत्वरां च बहुधा संमान्य, तेषु विद्यमानप्रामाणिकवैराग्यं च जानन्तः, तूर्णमेव एतेभ्यः संन्यासदीक्षां ददुः। एवं परमवैराग्यपरिपूर्णाः एते, संन्यासाश्रमम्, साक्षाद्ब्रह्मचर्याश्रमादेव प्रविश्य, धन्या अभूवन्। एवं प्राप्तसंन्यासानामेतेषां श्रीमद्वेदान्तरामानुजयतिः इति प्रसिद्धं नाम जातम्। अनन्तरकाले एते भगवद्रामानुजाचार्याणामवतारस्थलत्वेन प्रसिद्धं श्रीपेरुम्बूदूर् इति प्रसिद्धं श्रीमहाभूतपुरं गत्वा, तत्र भगवद्रामानुजाचार्याणां जीवत्याः मूर्तेः दर्शनं प्राप्य, तदाज्ञानुसारेण तत्परमशिष्याणां एम्बार्–इति प्रसिद्धानां मठस्याधिपतित्वेन नियुक्ताः अभूवन्।

अत्र प्रधानकारणं तु, एतेषां नानाशास्त्रनदीष्णत्वम्, परमवैराग्यं च। धनकनकादिलौकिकसर्वविषयविमुखा एते, सर्वदैव शास्त्रविषयप्रवणाः विशिष्य, नव्यन्याये, विशिष्टाद्वैतवेदान्ते, श्रीवैष्णवसंप्रदाये च, निष्णाता आसन्। अत एव, सर्वत्रापि स्वस्मिन् विद्यमानाः विद्याः प्रवर्तयितुं भक्त्युन्मेषवशात् नानाश्रीवैष्णवदिव्यक्षेत्रस्थ–भगवद्दर्शनोत्सुकाश्च सन्तः, समग्रेऽपि भारते बहुपर्यटनं कृतवन्तः। अत एव, श्रीरङ्गक्षेत्रे, यादवाद्रौ, अन्यत्र च तदा तदा गत्वा, तत्र तत्र विद्यमान विदुषः, प्रोत्साहयन्तः, अविदुषः विदुषः कुर्वन्तः, बहु–बहुशिष्याणामुपकारं निर्व्याजं विहितवन्तः। अपि च, स्वीयान्तरङ्गिकानुभवं पुरस्कृत्य, बहून् ग्रन्थान् स्वल्पान् महतश्च रचयामासुः। तत्र प्रसिद्धाः केचनैतादृशाः ग्रन्थाः –

सिद्धान्ततूलिका
मुक्तिपदशक्तिवादः
कैवल्यशतदूषणी
रहस्यत्रयमीमांसाभाष्यम् इत्यादयः।

एवं चत्वारिंशदधिकाः ग्रन्थाः महात्मभिरेतैरारचिताः। एवं, तादृशग्रन्थेष्वन्यतमः रहस्यत्रयमीमांसाभाष्यमितिनामकः। श्रीवैष्णवसंप्रदाये रहस्यत्रयत्वेन प्रथितं मन्त्रत्रयं यत्, तदर्थविशदीकरणप्रयोजनकम्, त्रयोदशशतकीयैः पिळ्ळै लोकाचार्य इति प्रसिद्धनामभिः श्रीकृष्णवर्यैः रचितम्, मणिप्रवाळभाषायामुपनिबद्धम्, सूत्रजालम्। अस्य सूत्रजालस्य भाष्यायमाणं व्याख्यानं रहस्यत्रयमीमांसाभाष्यमितिनामकम्। अत्र च, मणिप्रवाळभाषाग्रथितसूत्राणां श्रीभाष्यादिब्रह्मसूत्रभाष्यसदृश–व्याख्यानमधिकरणक्रमेण (अधिकरणरचनापूर्वकम्), कृतमस्ति। यथा मीमांसाशास्त्रे – विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्। . . . इत्यधिकरणं षडङ्गविशिष्टमूचुरस्माकं प्राक्तना विद्वांसः। एतादृशाधिकरणरचनाक्रम एवात्र एभिर्यतिवर्यैरुपात्तः। एवम्, श्रीभाष्योक्तक्रमेणैव शास्त्रारम्भसमर्थनादिविचाराः अत्रत्यसंदर्भानुसारेण योजिताः। किञ्च, एतेषां यतिवर्याणां नव्यन्यायेऽपि बहुपाण्डित्यमवर्तत। एतादृशपाण्डित्यं प्रकृतरहस्यत्रयमीमांसाभाष्यरचनेऽप्युपयुज्य, वेदान्तोदितानां बहूनां विषयाणां नव्यन्यायीयशैल्या परिष्कारादिकं व्यदधुः। एवम्, न्यायव्याकरणमीमांसाख्यसामान्यशास्त्रस्थाः विषयाः, वेदान्तस्य कृते, श्रीवैष्णवसंप्रदायस्य कृते च, बहूपायनीकर्तुं प्रभवन्तीति शतशः सोदाहरणं ग्रन्थेऽस्मिन् प्रदर्शयांबभूवुः।

एवमेव, अन्येऽपि बहवो ग्रन्थाः, बहुपाण्डित्यपूर्णाः नूतन–नूतनार्थविशदीकरणप्रयोजनाः, एतैर्निरमायि। एवमेव, प्रधानश्रीवैष्णवक्षेत्रेषु श्रीरङ्गादिषु अनेके विद्यार्थिनः बहुधा पाठिताः, तेषु च, प्रामाणिकं पाण्डित्यं चोत्पादितम्। एते चाचार्याः न केवलं प्राचीनपारम्परिकशास्त्रेषु पारदृश्वानः, अपि तु, भूगोलादिविषयेऽपि बहुविषयज्ञा अभूवन्निति विज्ञायते। श्रीमद्भागवतादिमहापुराणोक्तदिशास्य ब्रह्माण्डस्य स्वरूपम्, अत्रत्य चतुर्दशलोकादिकम्, सप्तसमुद्राः, आदिकूर्मदिग्गजादिविषयाश्च उत्तममहाचित्ररूपेण एतैः लिखिताः, संप्रत्यपि विराजन्ते, तदीयशिष्यपरम्परागतकुटुम्बेषु। एतैर्विरचितः "भूगोळभगोळविषयः" इति ग्रन्थः सर्वजनमान्यः आसीदिति बहुधा श्रूयते।

## उपसंहारः

एवमुपर्युक्तरीत्या एते यतिवर्याः वैराग्यशालिनः, ज्ञानिनः, विद्वांसः, आचारनिष्णाताश्चासन्निति अहो! एतेषां महतां वैशिष्ट्यम् ॥

## धन्यवादसमर्पणम्

अवसरेऽस्मिन् मम संशोधनमार्गदर्शकेभ्यः, श्री चामराजेन्द्रसंस्कृतकलाशालायाः प्रांशुपालेभ्यः डा ॥ विद्वान ॥ एस्. एन्. संपत्कुमार–महाभागेभ्यः, कर्नाटकसंस्कृतविश्वविद्यालयस्य बोधकवर्गेभ्यः, अधिकारिभ्यः, एतादृशलेखलेखने उपकृतवद्भ्यः अन्येभ्यश्च साञ्जलिबन्धं कृतज्ञताः आविष्क्रियन्ते।

## सहायकग्रन्थसूची

1. पिळ्ळैलोकाचार्यविरचितम् – मुमुक्षुप्पडि
2. वेदान्तदेशिकविरचितम् – रहस्यत्रयसारः
3. वेदान्तरामानुजयतिवर्यविरचितग्रन्थाः–रहस्यत्रयमीमांसाभाष्यम्
4. सिद्धान्ततूलिका
5. मुक्तिपदशक्तिवादः
6. कैवल्यशतदूषणी